## वदः सुपि क्यप् च। (१०६/२८५४)

अनुपसर्गे इति वर्तते। वदेर्धातोः सुबन्त उपपदे अनुपसर्गे क्यप् प्रत्ययो भवति, चकाराद् यत् च। ब्रह्मोद्यम्, ब्रह्मवद्यम्। सत्योद्यम्, सत्यवद्यम्। सुपि इति किम्? [1]वाद्यम्। अनुपसर्गे इत्येव, [2]प्रवाद्यम्॥

## भुवो भावे। (१०७/२८५५)

[3]सुप्यनुपसर्गे इत्यनुवर्तते। भवतेर्धातोः सुबन्ते उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति। यत् तु नानुवर्तते। [4]ब्रह्मभूयं गतः, ब्रह्मत्वं गतः[5]। [6]देवभूयं, देवत्वं गतः। भावग्रहणमुत्तरार्थम् (म. भा. २. ८४)। सुपि इत्येव, भव्यम्। अनुपसर्गे इत्येव, प्रभव्यम्॥

## हनस्त च। (१०८/२८५६)

सुप्यनुपसर्गे इति वर्तते, भावे इति च। हन्तेर्धातोः सुबन्त उपपदेऽनुपसर्गे भावे क्यप् प्रत्ययो भवति, तकारश्चान्तादेशः। ब्रह्महत्या। अश्वहत्या[7]। सुपि इत्येव, घातः। ण्यत् तु भावे न भवत्यनभिधानात्। अनुपसर्गे इत्येव, [8]प्रघातो वर्तते॥

## एतिस्तुशास्वृदृजुषः क्यप्। (१०९/२८५७)

सुप्यनुपसर्गे[9]भावे इति निवृत्तम्। सामान्येन विधानमे[10]तत्। एति स्तु शास् वृ दृ जुष् इत्येतेभ्यः [11]क्यप् प्रत्ययो भवति। इत्यः। स्तुत्यः। शिष्यः। वृत्यः। आदृत्यः। जुष्यः। क्यप् इति वर्तमाने पुनः क्यब्ग्रहणं बाधकबाधनार्थम्। 'ओरावश्यके' (३.१.१२५/२८८६) इति ण्यतं बाधित्वा क्यबेव भवति। अवश्यस्तुत्यः। वृग्रहणे वृञो ग्रहणम् इष्यते, न वृङः। वार्याः ऋत्विजः (म. भा. २.८४)।

[२१७] शंसिदुहिगुहिभ्यो वेति वक्तव्यम्।

शस्यम्, शंस्यम्। दुह्यम्, दोह्यम्। गुह्यम्, गोह्यम्।

[२१८] आङ्पूर्वादञ्जेः सञ्ज्ञायामुपसङ्ख्यानम्। (म. भा. २.८५)

आज्यं घृतम्।

कथम् उपेयम्? [12]एः एतद् रूपं, न इणः॥

---

1. वाद्यः ड. 2. प्रवाद्यः ड. 3. वाक्यमिदं नास्ति फ. 4. ब्रह्मभूतं यः गतः ह. 5. इत्यर्थः इत्यधिकम् ग. 6. उदाहरणमिदं नास्ति ग. 7. पशुहत्या इत्यधिकम् फ. ह. 8. घातो वर्तते ड. 9. भावे नास्ति क. फ. 10. एतत् नास्ति फ. ह. 11. धातुभ्यः इत्यधिकम् फ. 12. इञः क. ह.